उदीचीं ध्रुववेधेन मध्ययोगेन चोन्नयेत् ।
चतुरस्रां शिलां यत्र इष्टकां वा सुशोभनाम् ॥
चतुर्दिक्षु निवेश्याथ स्वस्तिचिह्नन्तु कारयेत् ।
एवं कृत्वा स्वस्तिचिह्नं ब्राह्मणांस्तत्र भोजयेत् ।
वैष्णवान् पायसेनाग्र्यान् द्वादशैव समाहितः ॥”
अथ शल्योद्धरणम् । मात्स्ये ।
“गृहारम्भेति कण्डूतिः स्वाम्यङ्गे यत्र जायते ।
शल्यन्त्वपनयेत्तत्र प्रासादे भवनेऽथवा ।
सशल्यं भयदं यस्मादशल्यं भयनाशनम् ॥”
हयशीर्षे ।
“आदिशेच्छास्तुनः शल्यं गृहिणोऽङ्गविकारतः ।
शकुनो दृश्यते वापि यस्य वा श्रूयते ध्वनिः ।
कीर्त्तयेत् यस्य वै नाम शल्यं तस्य विनिर्द्दिशेत् ॥”
अथ वास्तुमण्डलम् । मात्स्ये ।
“पञ्चगव्यौषधिजलैः परीक्षित्वावसेचयेत् ।
एकाशीतिपदं कुर्य्याद्रेखाभिः कनकेन तु ॥
पश्चात् पिष्टेन चालिप्य सूत्रेणालोड्य सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ॥
सर्व्ववास्तुविभागेषु विज्ञेया नवका नव ।
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ॥
पदस्थान् पूजयेद्देवान् त्रिंशत् पञ्चदशैव च ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्ते त्रयोदश ॥
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोध मे ।
ईशकोणादिषु सुरान् पूजयेच्च विधानतः ॥
शिखी चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगाः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च ॥
भल्लाटः सोमसर्प्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्च सुरान् शृणु ॥
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगाः ।
सव्यानेकोत्तरान् विद्यात् पूर्व्वाद्यान्नामतः शृणु ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्मृताः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ॥
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ।
आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्द्दितिस्तथा ॥
पदिकानाञ्च वर्गोऽयमेवं कोणेष्वशेषतः ।
तन्मध्ये तु बहिर्व्विंशद्द्विपदास्ते तु सर्व्वतः ॥
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥
वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक् ।
पावं यावत्तथा रोगात् पितृभ्यः शिखिनन्तथा ॥
मुख्यादृभृशं तथा शोषाद्वितथं यावदेव तु ।
सुग्रीवाददितिं यावत् भृङ्गात् पर्ज्जन्यमेव च ॥
एते वंशाः समाख्याताः क्वचिद्‌ज्ञेय एव तु ।
एतेषां यत्तु सम्पातः पदमध्यं समं तथा ॥
समं चैतत् समाख्यातं त्रिशूलं कोणगञ्च यत् ।
स्तम्भन्यासेषु वर्ज्ज्यानि तुलाविधिषु सर्व्वदा ॥
कीलोत्तुच्छोपघातादि वर्ज्जयेद्‌यत्नतो नरः ।
सर्व्वत्र वास्तुनिर्द्दिष्टः पितृवंशोत्तरायतः ॥
मूर्द्धन्यग्निः समाविष्टो मुखे चापः समास्थितः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावधिष्ठितौ ॥
वक्षःस्थले त्वापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्द्दितिपर्ज्जन्यौ श्रोत्रे दितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ तु पूजनीयौ प्रयत्नतः ।
सूर्य्यः सोमादयस्तद्वद्बाह्वोः पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्तं समाश्रितौ ॥
सावित्रः सविता तद्वद्धस्तं दक्षिणमाश्रितौ ।
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्म्मणिबन्धने ॥
तथैवासुरशोषौ च वामपार्श्वं समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सगृहक्षतः ॥
उर्व्वोऽर्य्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्मृगसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः ॥
जयः शक्रस्तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये तु स पूज्यते ॥
चतुःषष्टिपदो वास्तु प्रासादे ब्रह्मणः स्मृतः ।
ब्रह्मा चतुष्पदस्तद्वत् कोणेष्वेकपदास्तथा ॥
बहिःकोणेषु चाष्टौ तु सार्द्धाश्चोभयतः स्मृताः ।
त्रिंशतिर्द्दिपदास्त्वेवां चतुःषष्टिपदे स्मृतः ॥”*॥
हयशीर्षे ।
“वास्त्वङ्गं स्रत्रयेत् प्राज्ञः श्वेताम्बरधरः शुचिः ।
श्वेतगन्धानुलिप्ताङ्गः सर्व्वालङ्कारभूषितः ॥
चतुःषष्टि तु प्रासादे एकाशीति गृहे सदा ।
चतुरस्रीकृते क्षेत्रे अष्टधोभयभाजिते ॥
कोणरेखां ततो दत्त्वा सुरभागांस्तु कल्पयेत् ।
शिवः कोणार्द्धतो ज्ञेयः पर्ज्जन्यः पदसंस्थितः ॥
द्विपदस्थो जयो ज्ञेयः सुरेशश्चैकपादिकः ।
भास्करस्तु पदे ज्ञेयो द्विपदः सत्य इष्यते ॥
भृशः पदस्थो विज्ञेयो व्योमश्चैव पदार्द्धगः ।
हुताशनः पदार्द्धश्च पूषा च पदसंस्थितः ॥
वितथो द्विपदस्थश्च पदैकश्च गृहक्षतः ।
वैवस्वतः पदैकस्थो गन्धर्व्वो द्विपदस्थितः ॥
भृङ्गश्चैकपदो ज्ञेयो मृगश्चार्द्धपदे स्थितः ।
पितरश्चार्द्धतो ज्ञेयाः पदे दौवारिकस्तथा ॥
सुग्रीवश्च पदे ज्ञेयो द्व्येकस्थः पुष्पदन्तकः ।
यादसाम्पतिरेकस्थो ह्यसुरस्तु द्वि संस्थितः ॥
शोषश्चैकपदे ज्ञेयो ह्यर्द्धगः पाप इष्यते ।
रोगश्चार्द्धपदे ज्ञेयो नागश्चापि पदे स्थितः ॥
मुख्यश्च द्विपदे ज्ञेयो भल्लाटः पदसंस्थितः ।
यज्ञेश्वरः पदे ज्ञेयो नागस्तु द्विपदे स्थितः ।
पदस्था श्रीमहादेवी अदितिश्चार्द्धसंस्थिता ।
आपो ज्ञेयास्तु पदगा बली द्विपदसंस्थितः ॥
चतुष्पदस्थो विज्ञेयस्त्वर्य्यमा पूर्व्वमध्यगः ।
सविता तु पदे ज्ञेयः सावित्री च पदे स्थिता ॥
ततो विवस्वान् विज्ञेयश्चतुष्टयपदे स्थितः ।
इन्द्रश्चन्द्रो जयश्चैव एकैके संव्यवस्थिताः ॥
मित्रश्चतुष्पदस्थश्च पश्चिमे तु व्यवस्थितः ॥
रुद्रः पदैकसंस्थो वै यक्ष्मा चैकपदे स्थितः ।
धराधरश्च विज्ञेयो ह्युत्तरे च चतुष्पदः ।
चतुर्मुखश्चतुष्कस्थो मध्ये ज्ञेयः प्रजापतिः ॥”
अथ वास्तुपूजा । मात्स्ये ।
“अथातः संप्रवक्ष्यामि प्रासादविधिनिर्णयम् ।
वास्तौ परीक्षिते सम्यग्वास्तुदेहविचक्षणाः ॥
वास्तूपशमनं कुर्य्यात् पूर्व्वमेव विचक्षणः ।
एकाशीतिपदं लिख्य वास्तुमध्ये तु पिष्टकैः ॥
होमस्त्रिमेखले कार्य्यः कुण्डे हस्तप्रमाणके ।
यवैः कृष्णतिलैस्तद्वत् समिद्भिः क्षीरवृक्षजैः ॥
पालाशैः खादिरैर्व्वापि मार्गोड्म्बरसम्भवैः ।
कुशदूर्व्वामयैर्व्वापि मधुसर्पिःसमन्वितैः ॥
कार्य्यस्तु पञ्चभिर्ब्बिल्वैर्ब्बिल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेशे बलिं हरेत् ॥
तद्वद्विशेषनैवेद्यमिदं दद्यात् क्रमेण तु ।
ईशकोणे घृताक्तन्तु शिखिने विनिवेदयेत् ॥
ओदनं सफलं दद्यात् पर्ज्जन्याय घृतान्वितम् ।
जयन्ताय ध्वजं पीतं पैष्टं कूर्म्मञ्च संत्यजेत् ॥
इन्द्राय पञ्च रत्नानि पैष्टकं कुलिशं तथा ।
वितानकञ्च सूर्य्याय धूम्रं रक्तं तथैव च ॥
सत्याय घृतगोधूमं मत्स्यान् दद्याद्भृशाय च ।
शष्कुलीं चान्तरीक्षाय दद्याच्छक्तुञ्च वायवे ॥
पूष्णे लाजास्तु दातव्या वितथे चणकोदनम् ।
गृहक्षताय मध्वन्नं यमाय पिशितौदनम् ॥
गन्धौदनञ्च गन्धर्व्वे भृङ्गे मेषस्य शृङ्गकम् ।
मृगाय यावकं दद्यात् पितृभ्यः कृशरा मता ॥
दौवारिके दन्तकाष्ठं पैष्टं कृष्णां बलिं तथा ।
सुग्रीवे पूपकं दद्यात् पुष्पदन्ताय पायसम् ॥
कुशस्तम्बेन सहितं दद्यात् पद्मञ्च वारुणे ।
पैष्टं हिरण्मयं दद्यादसुराय सुरा मता ॥
घृतौदनं च शोषाय गोधां वै पापयक्ष्मणे ।
घृतलड्डुकांश्च रोगाय नागे पुष्पं फलान्वितम् ॥
सर्पिर्म्मुख्याय दातव्यं मुद्गौदनमतः परम् ।
भल्लाटाय ततो दद्यात् सोमाय घृतपायसम् ॥
सर्पाय पैष्टं शालूकमदित्यै लोपिकास्तथा ।
दित्यै तु पूरिकां दद्यात् दद्यैवं बाह्यतो बलिम् ॥
क्षीरमापाय दातव्यमापवत्साय वै दधि ।
सवित्रे लड्डुकान् दद्यात् समरीचान् कुशौदनम् ।
सवितुर्गुड़पूपांश्च जयाय घृतचन्दनम् ।
विवस्वते तथा दद्यात् रक्तचन्दनपायसम् ॥
हरितालौदनं दद्यादिन्द्राय घृतसंयुतम् ।
घृतौदनञ्च मित्राय रुद्राय घृतपायसम् ॥
आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे ।
पृथ्वीधराय मांसानि कुष्माण्डाय च दापयेत् ॥
सशर्कराम्नं संदद्यादर्य्यम्णे सर्व्वतः क्रमात् ।
नमस्कारान्तयुक्तेन मन्त्रेण पुनरेव च ॥
पञ्चगव्यं यवांश्चैव तिलाक्षतहविश्चरून् ।
भक्ष्यं भोज्यञ्च विविधं ब्रह्मणे विनिवेदयेत् ॥